# 4.1.2

**संस्थायाम् अधोनिर्दिष्टानि सौविध्यानि पर्याप्तानि सन्ति**

1. मूलसौविध्ययुतं सङ्गोष्ठीभवनम्
2. सांस्कृतिकादिकार्यक्रमाणां कृते सभागृहम्
3. प्रायोगिकसंस्कृतप्रकोष्ठः
4. यज्ञशाला
5. वेधशाला
6. भाषाप्रयोगशाला
7. मनोविज्ञान-प्रयोगशाला
8. ध्यानकेन्द्रम्
9. क्रीडासौविध्यानि (अन्तर्द्वार-बहिर्द्वार-देहदार्ढ्यादिकम्)
10. कलाकृतिसङ्ग्रहालयः (प्राचीनकलानां/ वस्तूनां सङ्ग्रहालयः)
11. प्राचीनशिल्पकलासङ्ग्रहालयः
12. पाण्डुलिपिसंसाधनकेन्द्रम् (एम्.आर्.सि.)
13. पाण्डुलिपिसंरक्षणकेन्द्रम् (एम्.सि.सि.)
14. ध्वनिमुद्रणालयः/ई-पी.जी-पाठशालासुविधाः
15. योगशिक्षणकेन्द्रम् / आधुनिकोपकरणयुक्तंयोगचिकित्साकेन्द्रञ्च
16. भारतवाणीसंसाधनेन सहयोगः
17. संस्कृतविज्ञान-आगमप्रदर्शनसुविधाः

**संस्कृतविश्वविद्यालयपरिसरे मूलभूतसुविधायुक्तं संगोष्ठीभवनम् –** सांस्कृतिककार्यक्रमार्थं सभागृहम्-यज्ञशाला-प्राचीन-नवीनवेधशाला-भाषाप्रयोगशाला-ध्यानकेन्द्रम्-क्रीड़ाक्षेत्रम्-मल्लभूमिः(अखाड़ा)-प्राचीन-कलाशिल्पयुक्त-संग्रहालयः-सरस्वतीभवने-पाण्डुलिपिसंरक्षणकेन्द्रम्-पाण्डुलिपिसंसाधनकेन्द्रम्-योग-साधना-केन्द्रम्–कम्प्यूटरप्रयोगशाला-प्राचीनमुख्यभवनम्–ध्वनिमुद्रणालयः-योगप्रशिक्षणकेन्द्रम्–प्रकाशकविभागः रसायन-विज्ञानशाला श्रमणविद्यासंकाये डा. गोकुलचन्दजैनकक्षे, बौद्धकक्षे वा नव्यभव्यविभिन्नसंयन्त्रसम्पन्न-प्रयोगशाला च इत्यादीनिसौविध्यानि उपलब्धानि सन्ति।

1. **मुख्यभवनम् –** देहीदेही-आचार्य-गुरुजनानां तपस्वाध्यायऽध्ययन-जपसंसाधनपरिपुतेऽस्मिन् विश्वविद्यालयपरिसरस्यमध्यभागे 'मुख्यभवनम्' विराजते। 2 नवम्बर 1847 ईस्वीये वर्षे महाराजबनारस-आंग्लसैन्याधिकारी श्रीनीवमहोदयैः भवनस्यास्य मूलप्रतिष्ठा (नींव) संजाता। चतूर्णां वर्षाणां (1948-52) महतापरिश्रमेण स्थापत्यविद्याविशारदमेजरमारखमकिट्टोमहोदयानां निरीक्षणे

मार्गदर्शने च भवनमिदं निजशोभनस्वरूपमवाप्तम्। विविध सुन्दरहृदयावर्जक-लोकभाषा-हिन्दीभाषा-आंग्लभाषादिसुभाषितैः सुसज्जितमिदमुख्यभवनम् पुनः राज्य सर्वकारस्यानुदानेन अस्य भवनस्य जीर्णोद्धारमभवत्।

2. **संगोष्ठिभवनम् –** विश्वविद्यालयपरिसरस्थितस्य श्रमणविद्यासंकायस्य सर्वविद्याधुनिकसंसाधनसम्पन्नं **श्रीगोकुलजैनसंवादशालाव्याख्यं एकं** सुन्दरं सुशोभितं संगोष्ठीभवनम्, यस्योद्घाटनं 04.12.2019तमे ईस्वीये महामहिमकुलाधिपतिश्रीमती आनन्दीवेन पटेलद्वारा कृतमस्ति। अस्मिन् भवने सुशोभनोपवेशन व्यवस्था वर्तते। सभा भवनमिदम् (संवादशाला) आवश्यकसुलभसौविध्ययुक्तम्। दृश्यश्रव्यमाध्यमयुक्तम् अन्तर्जालसम्बद्धम् – ध्वनिवर्धकादियुक्तञ्चास्ति। विविधऽवसरेषु बौद्धिक-सांस्कृतिक-सामाजिककार्य-क्रमाणामायोजनं भवति। आचार्याध्यापकछात्राः अस्य भवनस्य उपयोगं कुर्वन्ति। प्रभूतरूपेण आसन्दी व्यवस्था वर्तते। अस्मिन्नेव भवने ऑनलाइन संस्कृतप्रशिक्षण प्रयोगशाला संस्थापिताः।

3. **पाणिनियभवनेपाणिनिसभागारः**- तत्र विविध संगोष्ठि-सेमीनार-सांस्कृतिक-सामाजिककार्यक्रमाणामायोजनं भवति। छात्राध्यापककर्मचारिसर्वेषां कृते उपलब्धमिदं सभाभवनम् सभागारो वा। सर्वविधआधुनिकसंसाधनसमायुक्तं 250 आसन्दीसुशोभितम् च वर्तते।

मुख्यभवनान्तर्गते एकं बृहत्सभामण्डपमस्ति। तत्र सभासेमिनारगोष्ठी-दीक्षान्तसमारोहादिनामायोजनं भवति।

4. **सभागारः-**विश्वविद्यालयेऽस्मिन् बहवः सभागाराः बहुविधप्रकारोपयोगसमानषुपार च वर्तन्ते।
5. **कर्मचारीसंघभवने** अध्यापकसंघभवने च एकं एकं सुशोभित सुन्दरं आसन्दीयुक्तसभाभवनमस्ति।
6. **प्रायोगिकसंस्कृतप्रकोष्ठः**- ऑनलाइन संस्कृतप्रशिक्षणसभागारः वर्तते तत्र तु जुम माध्यमेन संस्कृतशास्त्रादीनां प्रशिक्षणं शिक्षणं च भवति।

**यज्ञशाला –** सांस्कृतिकाध्यात्मगुणसम्पन्नविश्वविद्यालयेऽस्मिन् वेदविभागस्य परिसरे एका सुन्दरयज्ञशाला वैदिककर्मकाण्डानुसारं निर्मिता वर्तते।

12मई1964 ईस्वीये-महामोपाध्यायः पं. भगवत्प्रसादमिश्रमहोदयः स्मार्ताग्नि-आधानेः औपासनपरिचर्यायाः शुभारम्भः कृतवानस्ति। यज्ञशालायामस्यां नवकुण्डात्मकं यज्ञमण्डपं स्थापिततमस्ति। यज्ञशाालायामस्यां द्वे मण्डपे भिन्नरूपेण विद्यमानेऽस्तः। तत्रैववेदविज्ञानकेन्द्रस्य स्थापना कृतामस्ति, यत्रतु विभिन्नप्रकारकैः यज्ञायोजनैः वैदिकज्ञानविज्ञानस्य अनुशीलनं संवर्द्धनं च भवति। छात्राध्यापकनां कृते सुशोभनेयं यज्ञशाला सर्वत्रराष्ट्रभक्तिपर्यावरणशुद्धि-माङ्गलिक चेतना-विश्वशान्ति-सर्वविकासादि अखिलब्रह्माण्डजीवमङ्गलकार्ये समर्पिताऽस्ति।

7. **वेधशाला –** सम्पूर्णानन्दसंस्कृतविश्वविद्यालयपरिसरे द्वयवेधशालाऽस्ति-प्राचीनानवीना च महामहोपाध्याय पं. सुधाकर द्विवेदी वेधशालाऽस्ति मुख्यभवनस्योत्तरभागे सुशोभिताऽस्ति। इयं प्राचीनावेधशाला। आचार्य मुरारिलालशर्मायन्त्रालयेत्याख्य नवीनावेधशाला शनिवार दिनाङ्क

13.03.2021 ईस्वीये पाणिनिभवनस्य ज्योतिषविभागे संस्थापितः सर्वावश्यकयन्त्रप्रविधिसमायुक्तः।

8. **भाषाप्रयोगशाला**-भाषा-ध्वनि-शब्दाक्षरोच्चारण-शुद्धाताप्रशिक्षणामर्थं पुण्यपरिसरेऽस्मिन् एकाभाषा प्रयोगशाला विविधोपकरणैः सुसज्जिता। मुख्यकार्यालयस्यदक्षिणपार्श्वे शोभनसौन्दर्यसम्बलितजाह्नवीभवने भाषाविज्ञानविभागेऽवस्थिताऽस्ति। विविधोपकरणैः श्रुत्वा दृष्टवा च छात्राः भाषाच्चारणध्वनितरङ्गपरिज्ञानार्थं अभ्यासं कुवन्ति। छात्राध्यापकानां कृतेयं प्रयोगशाला महदुपकारिणीवर्तते।

9. **योगसाधनाकेन्द्रम् –** विश्वविद्यालयपरिसरे 25 फरवरी 2001 ईस्वीये महामहिमपूर्वराज्यपाल प्रो. विष्णुकान्तशास्त्रीमहोदयैः समुद्घाटिता संस्थापिता च। छात्राध्यापककर्मचारीभिः विविधकार्यक्रमाणां योगप्रशिक्षणसेमिनारसभादिनामायोजनमत्र भवति। अत्र सुष्टु ध्वनिविस्तारयन्त्रव्यवस्था आसन्दी व्यवस्था च।

10. **मनोविज्ञानप्रयोगशाला –** छात्राणां मानसिक-शारीरिक-अध्यात्मिकः धैर्य संस्थापनाय विकासाय च सं.सं.वि.वि., परिसरस्य शिक्षाविभागे मनोविज्ञानप्रयोगशालाऽवस्थितावर्तते। मनोविज्ञानस्य विभिन्नक्षेत्रे शोधार्थिनां सहायिका भवति इयं प्रयोगशाला।

11. **क्रीडास्थलम् –** सम्पूर्णानन्दसंस्कृतविश्वविद्यालयस्य मुख्यभवनस्योत्तरपार्श्वे एकं बहुविस्तृतं क्रीड़ा स्थलमस्ति। तत्र छात्राध्यापका बहुविधक्रीड़ा कलानामायोजनं कुर्वन्ति। क्रिकेट-वालीवाल-फुटवाल-दौड़कुस्ती प्रतियोगितादिनां आयोजनं भवति। छात्राध्यापकाः मुक्तव्यायामशालायां बहुविध व्यायाम-ध्यान-प्राणायाम-चंक्रमणादिक्रियाः कुर्वन्ति।

12. **व्यायामशाला –** तत्रैव व्यायामशाला वर्तते।

13. मल्लभूमिः (अखाड़ा) परिसरैव क्रीड़ाप्रांगणस्य पार्श्वे एका मल्लभूमिस्ति

14. **कलाकृतिसंग्रहालय-पुरातत्त्वः** (प्राचीनशिल्पकलासंग्रहालश्च विराजते सं.सं.वि.वि. परिसरस्य दक्षिणप्रवेशद्वारस्यपार्श्वेऽवस्थितः)। 6 अक्टूबर 1958 ईस्वीये उत्तरप्रदेशस्य महामहिमराज्यपालश्रीवी.वी. गिरि महोदयैः संग्रहालयोऽमुद्घाटितः। संग्रहालयेऽस्मिन् सप्तसहस्राधिक-कलाकृतिनां पुरातत्त्वावशेषाणां च शोभनहृदयावर्जकः संग्रहोऽस्ति।

1. प्रागैतिहासिकास्त्रशस्त्राणां संग्रहः।
2. मौर्यकालः गुप्तकाल-टेराकोटा पर्यन्तं पुरातत्त्वावशेषाणां कलाकृतिणां च संग्रहः विद्यते। प्राचीनकला-पुरातत्व पारम्परिकवस्तूनामत्र शोभनोपलब्धिरत्र भवति।

15. **पाण्डुलिपि संरक्षणकेन्द्रम् –** महतः सरस्वतीभवनपुस्तकालयस्य अति प्राचीनज्ञानभण्डारे सुरक्षितानां पाण्डुलिपिनां संरक्षणार्थं पाण्डुलिपिसंरक्षणकेन्द्रं राष्ट्रिय पाण्डुलिपिमिशननवदेहल्याः सहायेन संस्थापितम्। इन्फोसिस फाउन्डेशनस्यार्थसहाय्येन संस्कृतसंवर्द्धनप्रतिष्ठानेन च 28 जून

2021 ईस्वीये वर्षे पाण्डुलिपिनां संरक्षणकार्यमारम्भमभवत् अधुनाऽपि वर्तमानकाले अनवरत रूपेण प्रचलति। संस्कृसंवर्द्धनप्रतिष्ठानेन 'पञ्चदिवसीय पाण्डुलिपिसंरक्षण कार्यशाला' आयोजिता। प्रतिष्ठानस्य निदेशकेन डा. चान्दकिरणसलुजा महादयेन प्रशिक्षणकार्यं सम्पादितम्।

संग्रहितपाण्डुलिपिनां 'माइक्रोफिल्मिंग' रूप महत्त्वपूर्णं कार्यं इन्दिरागांधीराष्ट्रीयकलाकेन्द्रेण कतिपयवर्षपूर्वं पूर्णरूपेण सम्पादितम्।

16. **पाण्डुलिपिसंसाधनकेन्द्रम् –** 1791 ईस्वीये संस्थापित संस्कृत पाठशालायाः संस्थापनया सह 'सरस्वतीभवनपुस्तकालयस्य' संस्थापनाऽभवत्। सरस्वतीभवनपुस्तकालये द्वे भवनेऽस्तः। **प्रथमः नवीन पुस्तकालयभवने** 2,30,000 मुद्रितग्रंथानामप्रतिमसंग्रहः वर्तते। **द्वितीयः प्राचीनभवने** पाण्डुलिपि संग्रहकेन्द्रमस्ति। यस्मिन् भवने कतिपयवर्षपूर्वपर्यन्तम् 1,11,132 पाण्डुलिपिनां विशालसंग्रहासीत्। परन्तु कारणविशेषात् अधुना 94567 पाण्डुलिपिनां संग्रहोपलभ्यते। पाण्डुलिपिनां संरक्षणार्थं दीर्घकालीकसुरक्षार्थञ्चानेकाधुनिकप्राचीन-तकनीकोपायानां संसाधनानां च व्यवहारः क्रियते। द्वात्रिंशं भागेषु पाण्डुलिपिविवरणरूपग्रन्थाः Catalogue प्रकाशिताः। **पाण्डुलिपिसंसाधनकेन्द्रस्यागामी ( भविष्यत्कालिकी ) कार्ययोजना इत्थं वर्तते।**
    1. लिपिविषयक कार्यशालाऽऽयोजनम् – पाण्डुलिपि संरक्षणार्थम्।
    2. व्याख्यानमाला आयोजनम्।
    3. मातृकाणां लेखीकरणम्।
    4. पाण्डुलिपिनां सम्पादनानुवाद प्रकाशन कार्यञ्च।
    5. मातृकाप्रशिक्षणम्।
    6. मातृकाप्रलेखीकरणम्।
17. **कम्प्यूटर प्रयोगशाला –** अनुसन्धानसंस्थानस्योपरि एका कम्प्यूटरप्रयोगशालाा वर्तते। तत्र छात्राणां कृते सौविध्यमस्ति।
18. श्रमणविद्यासंकायस्य डा. गोकुलचन्द्रजैनकक्षे (बौद्धकक्षे) सर्वविधसुविधासंपन्न-ऑनलाइन संस्कृत प्रशिक्षण प्रयोगशालान्तर्गत द्वितीय ध्वनि रिकार्डिंग केन्द्रमस्ति। ध्वनिरिकार्डिग-ध्वन्यङ्कनकेन्द्रमस्ति। भ्याएतत् केन्द्रम् विश्वविद्यालयछात्रेर्येभ्यश च अनुकूलकरं विद्यते।
19. **आधुनिकोपकरणयुक्तयोगचिकित्सा केन्द्रम्** छात्राध्यापककर्मचारिणां आध्यात्मिकाधिदैविकाधिभौतिकशक्ति संवर्धनार्थं विश्वविद्यालयस्य सांख्ययोगतंत्रागमविभागे अस्य संस्थापनं कृतमस्ति। छात्राध्येतृणां योग्यता-बुद्धि-प्रज्ञा संवर्धनार्थं प्रसन्नता-कार्यक्षमताविकासार्थञ्च भवति।

20. **भारतवाणी प्रकल्पेन सह सम्पर्कः-**भारतीय-भाषा- संस्थानेन सम्बद्धोऽयं विश्वविद्यालय अनेकानि कार्यक्रमाणि आयोजनमत्राभवत्। अधुना 16 मार्चतः-18 मार्च 2023 पर्यन्त भारतीय भाषा समिति सहाय्येन एका त्रिदिवसीयकर्मशाला आयोजिता। कार्यशालेयं भारतीयभाषासु अध्यापकनां छात्राणाञ्च संस्कृत भाषा सम्प्रेषणकौशलानां विकासाय समर्पिता। अनेके विद्वांसः नैकसत्रेषु प्रशिक्षणं दत्तवन्तः प्रतिभागीजना लाभं प्राप्नुवन्तः।

21. **संस्कृतविज्ञान आगम प्रदर्शन सौविध्यम्** विश्वविद्यालयेऽस्मिन् प्रकाशक संस्थानतः विभिन्नावसरेषु संस्कृतवैज्ञानिकागमपुस्तकानां प्रकाशनं प्रदर्शनं च भवति।